अनुक्रमांकः ....................................
निरीक्षकस्य हस्ताक्षरम् ..........................

**Paper Code**
**MAS-402**

# पतञ्जलिविश्वविद्यालयः

**परीक्षा – मईमासः – 2019**

**एम.ए. संस्कृतम्, (सत्रम् : चतुर्थम्)**
**काव्यशास्त्रम्**

**समयः – होरात्रयम्** **अधिकतमाङ्काः – 70**

**निर्देशः** अस्य प्रश्नपत्रस्य सप्तत्यङ्काः निर्धारिताः सन्ति। इदं प्रश्नपत्रम् 'क' 'ख' 'ग' इत्याख्येषु त्रिषु खण्डेषु विभक्तं वर्तते। प्रत्येकखण्डे प्रदत्तानां विस्तृतनिर्देशाणामनुसारेणैव प्रश्नाः समाधेयाः।

## खण्डः क
## (दीर्घोत्तरीयप्रश्नाः)

**निर्देशः 'क'** खण्डे पञ्चदीर्घोत्तरीयाः प्रश्नाः प्रदत्ताः सन्ति। प्रत्येकप्रश्नाय पञ्चदशाङ्काः निर्धारिताः वर्तन्ते। एतत्पञ्चप्रश्नेषु त्रयः प्रश्नाः एव समाधेयाः। **(3×15=45)**

1. 'व्यंग्यमेवं गुणीभूतव्यंग्याष्टौ भिदाः स्मृताः' इत्यस्य व्याख्या कार्या।
2. काव्यमीमांसाग्रन्थस्य प्रथमाध्यायस्य सारः लेखनीयः।
3. रसभावाद्याश्रयेण काव्यार्थानां कथमानन्त्यम् इति सदृष्टान्तं प्रतिपाद्यताम्।
4. 'आन्वीक्षिकी त्रयो वार्ता दण्डनीतिश्चेति विद्याः' अस्योपरि टिप्पणी लेखनीया।
5. 'उत्कर्षहेतवस्ते स्युरचलस्थितयो गुणाः' इत्यस्य व्याख्या कार्या।

## खण्डः ख
## (लघूत्तरीयप्रश्नाः)

**निर्देशः 'ख'** खण्डे षड्लघूत्तरीयप्रश्नाः प्रदत्ताः सन्ति। प्रत्येकप्रश्नाय पञ्चाङ्काः निर्धारिताः विद्यन्ते। एतेषु केवल चत्वारः एव प्रश्नाः समाधेयाः। **(4×5=20)**

1. 'सालङ्कारैर्ध्वनेस्तैश्च योगः संसृष्टिसङ्करैः' इत्यस्य आशयः कः ?
2. 'तत्र वर्णानां स्थानकरणप्रयत्नादिभिः निष्पत्तिनिर्णयिनी शिक्षा आपिशलीयादिका' इत्यस्य किं तात्पर्यम्?
3. 'अर्थचित्रं' सोदाहरणं वर्णनीयम्।
4. 'तच्च द्विधा अपौरुषेयं च' इत्यस्य कः अभिप्रायः ?
5. 'मिथोऽप्यनन्ततां प्राप्तः काव्यमार्गो यदाश्रयात्' इत्यस्य किं तात्पर्यम् ?
6. 'सर्वे नवा इवाभान्ति मधुमास इव द्रुमाः' इत्यस्य अभिप्रायः कः ?

## खण्डः ग
## (अतिलघूत्तरीयाः प्रश्नाः)

**निर्देशः 'ग' खण्डे दशातिलघूत्तरीयाः प्रश्नाः प्रदत्ताः सन्ति। प्रत्येकप्रश्नाय अर्द्धाङ्कः निर्धारितः वर्तते। अस्मिन् खण्डे प्रदत्तानां सर्वेषां प्रश्नानाम् उत्तरणमनिवार्यमस्ति ।** **(10×0.5=05)**

1. 'रीतिरात्मा काव्यस्य' इति कस्य कथनम् अस्ति ?
   (अ) भामहस्य (ब) मम्मटस्य
   (स) वामनस्य (द) क्षेमेन्द्रस्य
2. 'काव्यप्रकाशे गुणालङ्कारभेदनियतगुणनिर्णयो' नाम उल्लासः कः ?
   (अ) षष्ठोल्लासः (ब) सप्तमोल्लासः
   (स) अष्टमोल्लासः (द) पंचमोल्लासः
3. वैज्ञानिकदृष्ट्याऽलङ्काराणां वर्गीकरणविधायकः प्रथमः आचार्यः कः ?
   (अ) वामनः (ब) रूद्रटः
   (स) उद्भटः (द) दण्डी
4. 'चित्रं कतिविधम्' ?
   (अ) द्विविधम् (ब) त्रिविधम्
   (स) चतुर्विधम् (द) पंचविधम्
5. चित्रकाव्यस्य अपरं नाम किम् ?
   (अ) अधमकाव्यम् (ब) उत्तमकाव्यम्
   (स) तुल्यकाव्यम् (द) व्यंग्यकाव्यम्
6. काव्यप्रकाशे कति उल्लासाः सन्ति ?
   (अ) पंच (ब) षड्
   (स) नव (द) दश
7. आनन्दवर्धनस्य पितुः नाम किमासीत् ?
   (अ) हर्षवर्धनः (ब) राज्यवर्धनः
   (स) देवदत्तः (द) नोणः
8. कुत्र लावण्यं विभाति ?
   (अ) रचनासु (ब) कवितासु
   (स) भावनासु (द) अङ्गनासु
9. प्रतीयमानार्थः कैः वेद्यते ?
   (अ) वेदार्थतत्त्वज्ञैरेव (ब) काव्यार्थतत्त्वज्ञैरेव
   (स) भावार्थतत्त्वज्ञैरेव (द) सेवार्थतत्त्वज्ञैरेव
10. गुणीभूतव्यंग्यकाव्यस्य कति भेदाः ?
   (अ) नव (ब) दश
   (स) अष्ट (द) पञ्च

--------------x--------------